**<u>अर्क</u>**

**अर्कस्तु कटुरुष्णश्च वातजिद् दीपनीयकः**
**शोथव्रणहरः कण्डूकुष्ठक्रिमिविनाशनः।।**

**श्वेतार्कः कटुतित्तोष्णो मलशोधनकारकः।**
**मूत्रकृच्छ्रास्त्रशोफार्त्तिव्रणदोषविनाशनः।।**

**राजार्काः कटुतिक्तोष्णः कफमेदोविषापहः ।**
**वातकुष्ठव्रणान् हन्ति शोफकण्डूविसर्पनुत् ।।**

**श्वेतमन्दारकोऽत्युष्णस्तिक्तो मलविशोधनः ।**
**मूत्रकृन्छ्र व्रणान् हन्ति क्रिमिनत्यन्तदारुणान् ।। (Rjn)**

Arka is katu in rasa, usna in veerya, dipaniya, alleviates vata, sotha, vrana, kandu, kustha and krmi.

Sveta arka is katu, tikta in rasa, usna in veerya, mala sodhanakaraka, cures mutra krcchra, asra, sopha and vrana.

Rajarka is katu, tikta in rasa, usna in veerya, alleviates kapha, meda, visa, vata, kustha, vrana, sopha, kandu and visarpa.

Sveta mandara is tikta in rasa, atyusna, malasodhana, alleviates mutra krcchra, vrana and daruna krmi.

**अर्कद्वयं सरं वातकुष्ठकण्डूविषव्रणान् ।**
**निहन्ति प्लीहगुल्मार्शः श्लेष्मोदरशकृत्कृमीन् ।।**

**अलर्ककुसुमं वृष्यं लघु दीपनपाचनम् ।**
**अरोचकप्रसेकार्शः श्वासकासनिवारणम् ।।**

**रक्तोऽर्कपुष्पं मधुरं सतिक्तं कुष्ठक्रिमिघ्नं कफनाशनञ्च ।**
**अर्शोविषं हन्ति च रक्तपित्तं संग्राहि गुल्मेश्वयथो हितं तत् ।।**

**क्षीरम् अर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ।**
**कुष्ठगुल्मोदरहरं श्रेष्ठमेतद् विरेचनम् ।। (Bpn)**

Arka dvaya is sara in guna, cures vata, kustha, kandu, visha, vrana, pliha, gulma, arsa, slesmodara, sakrt and krmi.

Its kusuma is laghu in guna, vrshya, dipana, pacana, cures arocaka, praseka, arsa, svasa and kasa.

Rakta arka puspa is madhura, tikta in rasa, destroys kapha, alleviates kustha, krmi, arsa, visa, cures rakta pitta, sangrahi, gulma, svayathu.

Arka ksira is tikta in rasa, snigdha in guna, usna in veerya, salavana, laghu, alleviates kustha and gulmodara, is srestha virecana.

**अर्कमूलत्वचा स्वेदकरी श्वासनिबर्हणी ।**
**उष्ण च वामिका चैव फिरंगरोगनाशनी ।। (कश्चित्)**

Arka mula is sveda karaka, svasa nirbahana, usna in veerya, vamika, alleviates phiranga roga.